हाणमत्कृतंप्रहात ॥ द्रव्यहीनंक्रियाहीनंमंत्र
हीनंचयद्भवेत् ॥ सर्वंतत्कृपयादेविक्षमस्व
परमेश्वरि ॥ इतिपुष्पांजलींनिवेद्य ॥ मूले
नश्रीदेवींसमस्तधातुपुष्पांजलिभिःसंपूज्य ॥
सर्वमंगलमंगल्येशिवेसर्वार्थसाधिके ॥ श
रण्येत्र्यंबकेगौरिनारायणिनमोस्तुते ॥ इति
श्लोकंसमयापठित्वा ॥ पुष्पैःसंपूज्य ॥ अष्टां
गंवापंचांगंवाप्रणम्य ॥ भूमौस्खलितपा
दानांभूमिरेवावलंबनम् ॥ त्वयिजाताप
राधस्त्वमेवशरणंमम ॥ इतिवद्ध्वाप्रण
तिसर्वंतमाप्य ॥ अर्घ्यमादकंकेवलंपात्रान्तरे
नादाय ॥ ॐ ॥ इतःपूर्वप्राणबुद्धिदेहधर्माधि
कारतोजाग्रत्स्वप्नसुषुप्त्यवस्थासुमनसा
वाचाकर्मणाहस्ताभ्यांपद्भ्यामुदरेणशिश्ना ॥ यत्स्म

© Dharmarth Trust. Digitized By eGangotri

श्री
१८
38

नैवेद्यं यत्कृतं तत् श्रीगुरुदेवसमर्पितमं-
त्रस्वाहा ॥ मां मदीयं च सकलं श्रीज्वालामु-
खीभगवत्यै समर्पयेत् ॥ ॐ तत्सत् इत्यने-
न श्रीदेव्याश्चरणारविन्दयोर्हस्तोदकदा-
नेनात्मानं समर्पयेत् ॥ ततः मूलविद्ययाञ्ज-
लिं देवीं त्रिधा समभ्यर्च्य ॥ कृतांजलिः ॥ यद्द-
त्तं भक्तिमात्रेण पुष्पं पत्रं फलं जलम् ॥ निवे-
दितं च नैवेद्यं तद्गृहाणानुकम्पया ॥ आवा-
हनं न जानामि नैव जानामि पूजनम् ॥ विस-
र्जनं न जानामि क्षमस्व परमेश्वरि ॥ कर्मणा
मनसा वाचा नास्ति वान्या गतिर्मम ॥ अंतः-
श्चारणाभूतानां रक्ष त्वं परमेश्वरि ॥ मातर्देवि
मद्देहेषु येषु येषु च जाम्पदम् ॥ तेषु तेषु स्थु-
ता भक्तिरस्तु ते स्त सदा त्वयि ॥ देवी दात्री च
भोक्त्री च देवी सर्वमिदं जगत् ॥ देवी जयति
सर्वत्र या देवी सोऽहमेव हि ॥ यदत्र परिभ्र-
ष्टं मात्राहीनं च यद्गतम् ॥ तत्तं मदीसि देवे-
शि कस्मात् स्खलितं मनः ॥ नमस्ते देवदेवे-
शि ज्वालामुखि विश्वेश्वरि ॥ तव पादाम्बुजानि

© Dharmarth Trust. Digitized By eGangotri

यंतिस्वलाभंकिरस्तुमे ॥ इतिसंवेत्तमाध्य ॥
प्रदक्षिणानिकृत्वा । योनिमुद्रयाप्रणमेत् ॥
ततःशंखंवमुद्धृत्य ॥ देव्याःपरिभ्रामयित्वा ॥ सा
धुवासाधुवाकर्मयद्यदाचरितंमया ॥ तत्स
र्वंकृपयादेविगृहाणाराधनेमम ॥ इतिमं
त्रमुच्चार्य ॥ देव्याःदक्षहस्तेशंखजलंकिंचिद्द
त्वा ॥ शंखंयथास्थानेनिवेश्य ॥ तज्जलंकिं
चिद्वामहस्तेनिधाय ॥ मूलेनसप्तवारमभि
मंत्र्य ॥ तेनजलेनात्मानमभ्युक्ष्य ॥ अन्यान्
पिसामयिकान्शंखजलेनप्रोक्षयेत् ॥ ततः
पुष्पांजलिमादाय ॥ ॐरश्मिरूपामहादे
व्याश्चत्रशक्तिदेवताः ॥ ज्वालामुखींगतोली
नास्ताःसंतुसर्वेशुभावहाः ॥ इतिपुष्पांज
लिंदत्वापरिवारगणान् ॥ गणेशाद्यानष्ट
देवतासहितान्मूलदेव्याःदेहेविलीनान्वि
भाव्यपूर्ववत्कामकलारूपमात्मानंध्यात्वा
देव्यायभूषणाद्रूपमायुधंतत्सर्वंनिजदेहे
विचिंत्य । देवीरूपमात्मानंध्यायन् ॥ श्रीदेवीं
प्रणम्य ॥ मूलविद्यांतेश्रीज्वालामुखिभग

© Dharmarth Trust. Digitized By eGangotri

श्री
२९
39

वर्तितमस्वेतिनालत्रयपदानेन ॥ देवीं प्रबो-
ध्य ॥ तेजोमयीं विचिंत्य ॥ गच्छ गच्छ परे स्था-
ने स्वस्थाने परमेश्वरि ॥ यत्र ब्रह्मादयो देवा न
विदुः परमं पदं ॥ इत्युत्थाप्य ॥ संहारमुद्रया नि-
र्माल्यपुष्पेण तत्तेजः ॥ समुद्धृत्याघ्राय ॥ पूर-
कयोगेन शिरःस्थसहस्रदलकमले प्राप-
य्य ॥ तत्र तरुणतेजोरूपं तां ध्यात्वा ॥ सुषुम्णा
वर्त्मना ॥ ह्रां हृदयाय नमः ॥ इति हृदयक-
मलमानीय ॥ तत्र यथोक्तरूपां श्रीदेवीं ध्या-
यन् ॥ तिष्ठ तिष्ठ परे स्थाने स्वस्थाने परमेश्व-
रि ॥ यत्र ब्रह्मादयः सर्वे सुराः तिष्ठंति मे हृदि
इति हृदयकमले स्थापयित्वा ॥ तत्र सिंहा-
सनमध्यगतश्रीचक्रमध्यगतां सपरिवारां
परदेवतां मूलाधारे स्थापयेत् ॥ तत्र शंखा-
जलेन त्रिकोणवृत्तचतुरस्रमण्डलं निर्मा-
य ॥ तन्मध्ये शिखिकाख्यां निर्माल्यवासिनीं
ध्यात्वा ॥ तन्मंत्रः ॥ ऐं ह्रीं । नमः शि । उच्छिष्ट । चा-
ण्डालि । के । मातंगिनि ॥ नेत्र ॥ सर्ववशंका-
रि स्वाहा ॥ तन्मंत्रेण षडंगन्यासेन सकलीकृ

© Dharmarth Trust. Digitized By eGangotri

न्यतांध्यायेत्॥ नद्यथा॥ मातंगीनवश्यावकां
द्भवरणांश्रोलासिक्कुलाशुकीं॥ वीणांल्याः
सिकांसमणुन्नतकुचांमुक्ताप्रवालावलीम्
हृद्यांगींसितशंखकुंडलधरांविम्बाधरांस
स्मितां॥ आकर्णालकवेणिमञ्जनयनांध्या
येच्छ्रकृष्णामलां॥ इतिजगन्मोहिनींनिर्मा
ल्यवासिनींध्यात्वा॥ त्रिकोणमध्येदेवींनि
र्माल्येनपूंनमः॥ उच्छिष्टचाण्डालिमातंगि
निसर्ववशंकरिस्वाहा॥ इत्यनेनमंत्रेणपं
चोपचारैस्संपूज्य॥ पुनरपिनिर्माल्यपुष्पैः
संपूज्यत्रिः॥ नैवेद्यस्यशतांशंसंहृत्यांशवा
निवेद्य॥ ततोनिर्माल्यपुष्पांजलिमादाय॥
लेह्यचोष्यान्नपानादितांबूलसुगंधिलेपनं
निर्माल्यभोजनेनत्वंददामिश्रीशिवात्तया
इत्यनेनपुष्पांजलिंदत्वा॥ तालत्रयपूर्वकं
प्राणपद्यनितांविसर्जयेदिति। निर्माल्यवा
सिनींपूजयित्वा॥ ततस्तालत्रयपूर्वकं॥ ॐ
वनाथगुरोस्वामिदैशिकस्वात्मनायक॥
त्राहित्राहिकृपासिंधोदयांशान्तरांकुरु॥२

© Dharmarth Trust. Digitized By eGangotri

श्री
५

त्तिश्रीगुरुंप्रार्थ्य॥श्रीपात्रमामस्तकसुहृत्स
शिरसिस्थितायश्रीगुरवेसमर्प्य॥तत्पात्रंद
क्षिणकरेनिधाय॥गुरुपादुकाविधानं॥श्री
मज्ज्वालामुखी॥श्रीपादुकांतर्पयामीतित्रि
स्तर्प्य॥तत्पात्रंयथास्थानेविवेश्य॥तज्जल
किंचित्पात्रांतरेनिधाय।ॐआत्मतत्वायन-
मः॥ॐह्रींविद्यातत्वायनमः॥श्रींशिवतत्वा
यनमः॥समस्तविद्यासुखार्थं॥सर्वतत्वाय
नमः॥इतितस्मिंजलेतत्वचतुष्टयंविन्यस्य
तज्जलंपुनःपात्रांतरेसमुद्धृत्यचुलुकेनादाय
त्रैलोक्यलेशंनिक्षिप्य॥प्रकृतिबुद्ध्यहंकार
मनःश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपा
दपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवा
य्वग्निसलिलपृथिव्यात्मकस्थूलचतुर्विंश
तितत्वसहितं॥ग्रंग्रां॥८॥ॐआत्मतत्वात्म
कंस्थूलदेहंशोधयामिस्वाहा॥मायाकला
विद्यारागकालनियतिपुरुषात्मकसूक्ष्मा-
सूक्ष्मसप्ततत्वसहितं॥कंखं॥८॥ह्रींविद्यात-
त्वात्मकंसूक्ष्मदेहंशोधयामिस्वाहा॥शिव-

© Dharmarth Trust. Digitized By eGangotri

शक्तिसदाशिवेश्वरशुद्धविद्यात्मकंपंचतत्त्व-
सहितं ॥ ९८ ॥ ५ ॥ श्रीशिवतत्त्वात्मकंपरदेहंशो-
धयामिस्वाहा ॥ शिवशक्तिसदाशिवेश्वरशु-
द्धविद्यामायाकलाविद्यारागकालनियतिपु-
रुषप्रकृतिबुद्ध्यहंकारमनःश्रोत्रत्वक्चक्षुर्जि-
ह्वाघ्राणवाक्पाणिपादपायूपस्थ ॥ शब्दस्पर्श-
रूपरसगंधाकाशवाय्वग्निसलिलपृथिव्या-
त्मकंशुद्धमिश्राशुद्धषट्त्रिंशतत्त्वसहितं ॥ स-
मस्तमूलविद्यांचोच्चार्य ॥ सर्वतत्त्वस्थूलसू-
क्ष्मपराख्यदेहत्रयाभिमानिनंजीवात्मानंशो-
धयामिस्वाहा ॥ इतिकुलकचतुष्टयंस्वीकृ-
त्य ॥ तन्मात्रेकराभ्यामादाय ॥ मूलविद्यांचो-
च्चार्य ॥ प्रकाशाकाशहस्ताभ्यामवलंब्यो-
न्मनीस्रुचम ॥ धर्माधर्मकलास्नेहपूर्णंव-
ह्नौजुहोम्यहम् ॥ इत्युच्चार्यतज्जलमश्नीयात्
ततःकराभ्यांमूर्धादिपादांतं । पूर्वोक्तषट्त्रिं-
शत्तत्त्वात्मकतांभावयेत् ॥ स्वदेहस्यशेषत ॥
अथैतावत्कर्मशक्तःसंध्याग्रहणाक्रव-
दाचमनविधिनातत्त्वचतुष्टयंशोधयेत् ॥ त

श्री
पा
41

तः स्वसामयिकाम्नायाशास्त्रं संशनयेत ॥ सु
भमस्तसाधकानाम् ॥ ॐ अद्युनादेवि वक्ष्ये हं
पात्रवन्दनमीश्वरि ॥ त्वत्कालेयहृदानन्दपात्रं
देवेशावंदितम् ॥ पूजा योपात्रमानन्दभैरविते·
परमेश्वरि ॥ गृहणादेतसम्यक्शक्तिमेश्वि·
रसात्तदा ॥ ॐ श्रीमद्रुद्रवेशात्वरश्रविलसच्छ्व
द्वाम्रतालाविते ॥ तेजाधीश्वरयोगिनीगण
महासिद्धैः समाराधितम् ॥ आनंदागमकं
द्वात्मकमिदं साक्षात्त्रिखण्डामृतं ॥ वन्दे श्री·
प्रथमं करांबुजगतं पात्रं विशुद्धिप्रदम् ॥ २
स्थापितं तव शोधयामि स्वाहा ॥ दे मांसिधुरसा·
वेदं दयितयादत्तं च पेयादिभिः ॥ किंचिश्चञ्च
लरक्तपंकजदृशा मानंदमुद्दीपितम् ॥ वामे
स्वाङ्के विशुद्धसुहृदिशा कलेपाणौ निधायस्व
के ॥ वन्दे पात्रमहं द्वितीयममृतानंदैकसंव
र्धनम् ॥ विघातं तव शोधयामि स्वाहा ॥ ३ ॥ सर्वा
स्त्रायकलाकलापकलितं कोन्नद्धलोघात·
नं ॥ चंद्रपेदंमदैर्दशोभवक्रणाब्जलादिभिः से
वितम् ॥ ध्यातं देवगणैः परंमुनिगणैः मोह

© Dharmarth Trust. Digitized By eGangotri

र्षिभिः सर्वदा ॥ वन्देयात्रमहं तत्तीयमधुना
स्वात्मावबोधव्रतम् ॥ शिवतत्त्वं शोधयामि
स्वाहा ॥ ३ ॥ मध्यमीनसमावृंदैरिह ब्रह्मादि
भिः पूजितं ॥ मुद्रामैथुनधर्मकर्मनिरतं हा
राम्लातिकाश्रयम् ॥ आचार्याष्टकसिद्धभै
रवकुलाधीशेन संशोधितं ॥ पायात्स्वचमा
कारतत्त्वसहितं पात्रं च तत्त्वं नुमः ॥ शिवतत्त्वं
शोधयामि स्वाहा ॥ ४ ॥ आधारे भुजगाधिरा
जवलये पात्रं महामण्डले ॥ द्रव्यं सममसमृद
वारिपिशितं चाष्टौ च दिग्दन्तिनः ॥ सोऽहं भैरव
मर्चयाम्यतिदिनं तारागणैरत्नैर्नरादित्यादिः
स्वैरिड्संविन्नमिदं पात्रं भजे पंचमम् ॥ विद्या
तत्त्वं शोधयामि स्वाहा ॥ ५ ॥ सत्कुर्यामलभद्र
पीठपरमानंदोदयादायकं ॥ सम्यग्राज्यकर
सद्योहस्वविकरं साधुज्यसाम्राज्यपदम् ॥ नाना
आधिभवात्यकारदरागं जन्मांतरध्वंसनं ॥
श्रीमद्भैरवभैरवीप्रियतरं पात्रं च षष्ठं नुमः
आत्मतत्त्वं शोधयामि स्वाहा ॥ ६ ॥ जाग्रत्स्व
मस्वधुमिन्नर्यपरतस्थेनन्यसात्प्रदं ॥ विश्व

© Dharmarth Trust. Digitized By eGangotri

श्री
पर
42

ज्ञाकरवन्द्रनिस्त्वयन्तु यो ज्योतिष्कलाव्याप्ति
तम्। येत्रापि गलमध्यगात्रिवलयान्तस्था प्रवे
धोहृतं। पात्रं सममधुरेणोननतरूपणानन्दप्रदे
यान्तु माम्॥ आत्मतत्त्वं शोधयामि स्वाहा॥ १
विद्याश्रीगुरुपात्रकौ च तिलकं कण्ठे पि सा
रस्वतं॥ शान्तौ वीगवलशौर्यवृद्धिदं रागेदेह
स्थितेः कारणम्॥ वाञ्छासिद्धिकरं मनः॥
स्थितिकरं वशप्रजनगन्धोविनाम्। पात्रं चाष्ट
ममष्टसिद्धिकरणं शोफप्रसंत्रभजे॥ वि-
द्यातत्त्वं शोधयामि स्वाहा॥ २॥ सर्वानन्दक
रं सदाशिवपदं सर्वार्थसम्पत्प्रदं॥ सायुज्या
र्थकरं समस्तसुखदं चाज्ञानविध्वंसनम्॥
आयुष्कान्तियशोविवर्धनकरं संसारमो
हच्छिदम्॥ पात्रं ललतगणामेकं च नवमेव
देवतापालयम्॥ शिवशक्तितत्त्वं शोध
यामि स्वाहा॥ ३॥ ब्रह्मविष्णुमहेशानां देवा
नां च विशेषतः॥ तुष्टये पावनं पात्रं दशमं
प्रणमाम्यहम्॥ ४॥ पापघ्नं शान्तिशुभदं
दिव्यं स्वादुसुधालयम्॥ पात्रमेकादशं व-

© Dharmarth Trust. Digitized By eGangotri

देगुरुसेवासुखागतं ॥ ४ ॥ सकलतत्त्वेशो-
षयामिस्वाहा ॥ पात्रेकृत्वाकरोमिश्री सर्वकर्म
लभेत्तत्वा ॥ इहलोके श्रियंभुक्त्वा देहान्ते भैर-
वंभवेत् ॥ ५ ॥ अलिपिशितमुद्रांश्रीभोगपूजा-
परोहं ॥ वहुविधकुलमार्गैरभसंभाविताः-
हं ॥ पशुजनविमुखोहं भैरवीमाश्रितोहं ॥ ग-
रुचरणपरोहं भैरवोहं शिवोहम् ॥ करपा-
त्रस्थिविस्तोत्रे आनंदामृदयाम्बुजं । मूर्भिश्री-
गुरुपादाब्जस्मरणात्किमतः परम् ॥ ६ ॥ पके-
नशुष्कवटकेनघटेपिवामिवापोपिवामि
सहसालवणार्द्रकेन ॥ आस्वाद्यमांससमलि-
रोहितसुराद्वारिंगेणापिवामियमुनासह
सागरेण ॥ ७ ॥ करेमालामविहालावामेरा-
मास्यकोमला ॥ हृदयेत्रिपुरावालायागशा-
लागृहेगृहे ॥ ८ ॥ पात्रेभैरवपात्रेगोत्रेश्रीना-
थपादयपाडुकागोत्रम् ॥ शास्त्रंसंविच्छास्त-
त्तानेनस्वाववोधंकेज्ञानम् ॥ ९ ॥ वामेरामार-
मणाऊशलादाहिणोवालिपात्रे ॥ अग्रेशुद्ध-
श्वणाकवटकस्यसकरेमांसमुद्रिः ॥ स्कन्दी-

© Dharmarth Trust. Digitized By eGangotri

श्री
धर
43

वीणीस्वरसकविता सद्गुरुः सत्कथायां॥ कौ
लोमार्गः परमगाद्लो योगिनामप्पराम्पः॥ ९
वामे च लक्ष्मलोस्तु वेच मदिरापात्रं कराम्भो
रुहे॥ मूर्ध्नि श्रीगुरुचिंतनं भगवतीध्यानास्य
टमानसम॥ जिह्वायां जपसाधने परिणा
तिः कौलक्रमाभ्यासते॥ ये संतो नियतं पिबं
ति मद्वरसे ते भुक्तिमुक्तीगताः॥ ९९॥ पीत्वा पी-
त्वा पुनः पीत्वा यावत्पतति भूतले। उत्थाय
च पुनः पीत्वा पुनर्जन्म न विद्यते॥ धर्माधर्म
हविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा॥ सुषुम्णा
वर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम॥ प्रकाश
काशहस्ताभ्यामवलंब्योन्मनी स्रुचम। ध
र्माधर्मकलास्नेहपूर्णां वन्हौ जुहोम्यहम॥
यावन्न चलते दृष्टिर्यावन्न चलते मनः॥ ताव
त्पानं प्रकर्तव्यं पशुपानमतः परं॥ ऊर्ध्वपा
त्रश्रेज्ञा समाप्य॥ ततः पूर्वस्थापितवलिपा
त्रस्थमन्नादिमेकस्मिन्पात्रे कृत्वा। साधकपा
त्रहस्तः॥ पूजागृहाद्बहिर्गत्वा॥ जलेन स्रा
वोद्देशे चतरस्रवृत्तत्रिकोणात्मकं मण्डलं

कृत्वा ॥ तत्रगदात्रिशूलडमरुपात्रहस्तं त्रि
लोचनं कृष्णाभं भैरवं देवं सर्वविघ्नविनाश
नम् ॥ साधकः करमारभ्य ॥ वामे धेकरपर्य
न्तमाङ्गुष्ठध्यानम् ॥ इत्युच्छिष्टभैरवं ध्यात्वा
गन्धादिभिः संपूज्य ॥ ॐ ऐं ह्रीं श्रीं उच्छिष्टभैर
वप्रेहिहि बलिं गृह्ण ॥ २ ॥ हूं फट् स्वाहा ॥ इ
ति मन्त्रेण मांसलोपरिपात्रस्थं बलिं दद्याद्वि
सृज्य ॥ तस्मात्रेहस्तौ पादौ च प्रक्षाल्याचम्य ॥
तस्मात्रं जलेन प्रपूर्य ॥ प्रज्ञाग्रहस्तौ गत्वा ॥ उ
दृयोस्तत्रेति ब्रुवन् ॥ अन्तः प्रविश्य ॥ स्वासने
चोपविश्य ॥ तस्मात्रस्थजलेविशोध्य स्वजल
विउद्धृत्वा ॥ तेन जलेन स्वात्मानमभिषिञ्चं
येदिति स्तोत्रं पठेत् ॥ श्रीवामकेश्वरतन्त्रे ॥ ॥
ॐ नश्यन्तु प्रेतकूष्माण्डा नश्यन्तु दूषका नराः
साधकानां शिवः सन्तु आम्नायपरिपालिना
जयन्तु मातरः सर्वा जयन्तु योगिनीगणाः ॥
जयन्तु सिद्धडाकिन्यो जयन्तु गुरुपङ्क्तयः ॥ २
नन्दन्तु योगिनः सिद्धा नन्दन्तु भैरवादयः ॥ न
न्दन्तु देवताः सर्वाः सिद्धविद्याधरादयः ॥ ये

© Dharmarth Trust. Digitized By eGangotri

श्री
४४

वास्त्वायविश्वकर्मामेचिणाःशुद्धबुद्धयः॥स
र्वेदानेनदानदयानंदंतममभक्तितः॥नवग्र
हाश्चयोगाःकरणास्तिथयापरे॥सर्वेतेसु
खिनोयांतिमासाश्चतिथयस्तथा॥५॥ऋष
यःपितरःसर्वेअनंतवावसुरादयः॥भूचराखे
चराश्चैवतृप्यंतममभक्तितः॥६॥अंतरिक्ष
चराये च ये चान्येदेवयोनयः॥सर्वेतेसुखि
नोयांतसर्वेनिघ्नपदागणाः॥७॥मरुद्वसु
रवेश्चैवपर्वताःकन्दरागुहाः॥अश्वत्थाद्याः
लिणाःसर्वेशांतिंकुर्वंतमेसदा॥८॥तीर्था
निपशवोगावोयेचान्येप्राणभूमयः॥वृक्षाः
पतिव्रतानार्यःशिवंकुर्वंतमेसदा॥९॥शिवे
सर्वत्रमेवास्तुपुत्रधारयनादिषु॥राजानः
सुखिनःसंतममागोत्रमेसदा॥१०॥शु
भामेदिवसायान्तुमित्रास्विष्टंतुमेशिवाः॥
साधकाजयिनःसंतुशिवालिष्टंतुपूजकाः। ॥
द्वेष्टारःसाधकानांचसदेवाश्रायदूषकाः॥सा
धकिनीनांप्रवियान्तुसर्वालापिशिनेस्तता। ॥१२
शत्रुवोनाशमायान्तुममनिन्दाकराश्चये।

© Dharmarth Trust. Digitized By eGangotri

द्दृष्टारः साधकानां च विनश्यन्तु शिवाज्ञया ३
ये निन्दकास्ते विलयं प्रयान्तु मम साधकास्ते-
प्रभवन्तु सिद्धाः ॥ सर्वत्र देवी करुणावलो-
कापूरः परेश्वरी मम सन्निधताम् ॥ ४ ॥ इ
ति ये :: ॥ ॐ श्री देव्यै सिद्धिदायन्यै न-
मः ॥ अथ शान्तिस्तोत्रं ॥ ॐ श्री भैरव उवाच ॥
ॐ देवि वक्ष्यामि पूजान्ते शान्तिस्तोत्रमनुत्त-
मं ॥ वीराघनमयानन्दपदप्राप्त्युन्नामयम्
योगिनीचक्रमध्यस्थं मातृमण्डलवेष्टितं ॥
नमामि शिरसा नाथं भैरवं भैरवीप्रियम् ॥ अ-
नादिवीरसंसारस्थायिधर्मसकेतवे ॥ नमः
श्रीनाथवेधायकुलौघधर्मदायिने ॥ आपा-
दौडरिन्तरागाः समयाचारलङ्घनात् ॥ येम
वैनश्यपोहन्तु दिव्यचक्रस्य मेलनात् ॥ आ
युरारोग्यमैश्वर्यं कीर्तिलाभः सुखं जयः ॥
कान्तिर्मनोरथश्चास्तु पातु सर्वाश्च देवताः
सश्रुनकानाश्रितिपालकानां यतीन्द्रयोगेन्द्र-
तपोधनानाम् ॥ देशस्य राष्ट्रस्य कुलस्य रा-
तः करोतु शान्तिं भगवान्कुलेशः ॥ नन्दन्तु

© Dharmarth Trust. Digitized By eGangotri

साधककुलान्वयदर्शीकार्येस्वक्षादिनाप्य
चतःकमहान्वयाय॥नन्दन्तुसर्वेकुलको
लरताःपरैयण्यैविशेषःपदमेदकष्णा-
भवाय॥नन्दन्तुसिद्धगुरवस्तुगणक्रमो
धाःजेयष्टान्वगाःसमायिनोवटुकाःकुमार्यं
घट्योगिनीप्रवरवीरकुलप्रसक्ताःनन्दन्तु
भूमिपतिगोद्विजसाधुलोकाः॥नन्दन्तु
नीतिनिपुणाःनिरवद्यनिष्ठाःनिर्मत्सरा
निरुपमाःनिरुपद्रवाश्चनिस्पानिरजनर
तागुरवोनिरीहाः॥प्रान्त्वाश्चशान्तसन्तसा
ल्पतशोकशङ्काःनन्दन्तुयोगिनिरताःकु
लयोगयुक्ताआचार्यसामयिकसाधकपु
त्रकाश्च।गावोद्विजाःयुवतयोःयतयःकु
मार्योधर्मेभवन्तुनिरताःगुरुभक्तियुक्ताः
नन्दन्तुसाधककुलान्यणिमादिनिष्ठाः
प्रापाःपतन्तुसमयद्विषियोगिनीनाम्॥
साशाम्भवीस्फुरतुकापिममाप्यवस्था
यस्यांगुरोश्चरणपङ्कजमेवलभ्यम्।या
स्वक्रकमभूमिकावसतयोनाशयाःसं-

स्थिताः ॥ याकायद्रुमेरौमकुपनिलयाया
संस्थितायात्रयु ॥ उल्लासोर्मिमहान्तरङ्गनि-
लयानिष्ठासदासाश्रयाः ॥ देह्याद्रिपुप-
ल्पभवनपराःत्पन्नकोलार्चिताः ॥ या
दिव्यक्रमपालिकास्तिनिगतायादेवतास्ता
यग्ना ॥ यानित्यमप्रथितप्रभाशिविगतायाः
मातरिश्वाश्रया ॥ यायोमान्तनमण्डलान्त
मधुयायाःसर्वगाःसर्वदा ॥ ताःसर्वाःकुल-
मार्गपालनपराःशान्तिंप्रयच्छन्तुमे ॥ ऊर्ध्व
ब्रह्माण्डतोवादिविगगनतलेभूतलेनि-
ष्कलेवा ॥ पातालेवानलेवासलिलपवन-
योर्यत्रकुत्रस्थितावा ॥ क्षेत्रपीठोपपीठादि-
षुचकृतपदाधूपदीपादिमांसैः ॥ प्रीतादे-
व्यःसदानःशुभबलिविधिनापान्तुवीरेन्द्र-
वन्द्याःब्रह्माद्याःशिवगणेशगुहवटुकगणा-
भैरवाःक्षेत्रपालाः ॥ वेतालादित्यरुद्रयक्षव-
सुमनुसिद्धाप्सरोगुह्यकाद्याः ॥ भूतानागन्धर्व
विद्याधरऋषिपितृयतास्सुरादिप्रभूता ॥ यो
गीशाभ्यारणाःकिंपुरुषमुनिसुराम्बकर-

© Dharmarth Trust. Digitized By eGangotri

श्री
५८
46

गाः पांतु सर्वे ॥ देहस्थाखिलदेवतागणसुखा
तेत्राधिपा भैरवा ॥ योगिन्यो वटुकाश्च यक्षपि
तरो भूताः पिशाचा ग्रहाः ॥ अन्ये भूचराः दिक्च
राश्च खेचरा वेतालकाश्चेटकाः ॥ तृप्ताः सुः
कुलपुत्रकस्य पिबतः श्रीवीरसंतर्पणात् ॥
मत्स्यं चेद्ध्रुवकामेव पितृदेवाशाखवयोगि
नीप्रीतिश्चस्य देवतास्य यदि चेद्दृढाः प्रमाणं
चे चेत् ॥ शाक्तेयं यदि दृश्यते भवति चेद्दाज्ञय
मेघालि चेत्स्मृत्यापि च कैलिकाश्च यदि चे
त्स्यान्मे जयः सर्वदा ॥ रक्षंतु मातरः सर्वाः
सशस्त्राः सगणाधिपाः ॥ योगिन्यः क्षेत्रपा-
लाश्च मम देहे व्यवस्थिताः ॥ शिवाद्यवनिप
र्यन्तं ब्रह्मादिस्तम्भसंयुतम् । कालाग्न्यादि
शिवान्तं च जगद्येतेन तृप्यतु ॥ पठित्वेदं न
मेद्वीरा द्वीरवन्दनमाचरेत् ॥ स्तवेद्वीरान्नम
द्वीरान्मंत्रसिद्धिः प्रजायते ॥ शांतिस्तोत्रं पठित्वा
वीरवन्दनस्तोत्रं पठेत् ॥ ❖ ॥ ❖ ॥

ॐ जगत्त्रयाभ्यर्चितशासनेभ्यः
परार्थसम्पादनकोविदेभ्यः ॥ ॥

समुद्धतक्लेशमहारोगेभ्यो नमो नमः साध
कनायकेभ्यः ॥ प्रहीनसर्वाश्रयवासनेभ्यः
सर्वार्थतत्त्वोचितसाधनेभ्यः ॥ सर्वप्रजाभ्युद
रणोद्यतेभ्यो नमो नमः साधकनायकेभ्यः ।
निस्तीर्णसंसारमहार्णवेभ्यः सकलालोका
त्कालननेत्रेभ्यः ॥ जरारुजामृत्युनिवार
केभ्यो नमो नमः ॥ सद्धर्मरत्नाकरभाजने
भ्यो निर्वाणमार्गोत्तमदेशिकेभ्यः ॥ सर्वज्ञ
मेपूर्णमनोरथेभ्यो नमो नमः ॥ लोकानुक
म्पाभ्युदितादरेभ्यः कारुण्यमैत्रीपरिभा
वितेभ्यः ॥ सर्वार्थचर्यापरिपूरकेभ्यः नमो
नमः ॥ विध्वस्तनिःशेषकुवासनेभ्यो ज्ञाना
ग्निनादग्धमलेन्धनेभ्यः ॥ प्रज्ञाप्रतिज्ञाप
रिपूरकेभ्यो नमो नमः ॥ सर्वार्थिनाशाप
रिपूरकेभ्यो विनेयपद्माकरबोधकेभ्यः ॥
विश्लेषणसर्वार्थगुणाकरेभ्यो नमो नमः ।
स्वनेनकर्माजितशासनेभ्यो ब्रह्मेन्द्ररुद्रा
दिनमस्कृतेभ्यः ॥ परस्परानुग्रहकारके
भ्यो नमो नमः ॥ विमग्रभूतादिमहाभये

© Dharmarth Trust. Digitized By eGangotri

श्री ४२

भ्यो मयन्त्वकाचारपरायणेभ्यः ॥ समस्तसौ
भाग्यफलाकरेभ्यो नमो नमः ॥ विमग्रडुक
मेजवासनेभ्यः समन्ततोज्जुष्टमहायशोभ्य
लभ्यो मलत्रानकृतास्पदेभ्यो नमो नमः ॥
सर्वागमाम्नायिमहालवेभ्यः ॥ श्रीचक्रप
जाय परायरेभ्यः ॥ श्रीवीरचर्याचरणान्त॰
मेभ्यो नमो नमः ॥ श्राम्भविशाम्भवेभ्यः ॥
श्रीमन्नकोटिस्तुतिभूषणेभ्यो महाविशाड
लासदशान्तिकेभ्यः ॥ श्रुद्वेनतत्वामृतभा
जनेभ्यो नमो नमः ॥ षड्विंशतालक्षणभू॰
षितेभ्यो श्राक्कलपद्माकरशोचनेभ्यः ॥ प्र
तप्तचामीकरविग्रहेभ्यो नमो नमः ॥ सद्वा
यसम्भारसमाश्रितेभ्यः संसारनिर्वाणप्र
दर्शनेभ्यः ॥ महाकृपावेष्टितमानसेभ्यो
नमो नमः ॥ पैरकाविस्तानरसाकुलेभ्यो॰
वामाश्रिताचारभयानकेभ्यः ॥ स्वान्तश्चवि
ध्वस्तजगत्तमेभ्यो नमो नमः ॥ प्रसप्रानव
याम्रमहाफलेभ्यो महान्धकारापहारि
तमेभ्यः ॥ परस्परानन्दपरिपालकेभ्यो न

© Dharmarth Trust. Digitized By eGangotri

मो नमः ॥ विभ्रनकेशालिकपालकेभ्यः ॥
स्वरासवारक्तविलोचनेभ्यः ॥ नवीनकोतार
ननत्पदेभ्यो नमो नमः ॥ विभूतिलिप्ताङ्गदि
गम्बरेभ्यश्चिताग्निधूममालिभयानकेभ्यः ॥
कपालपात्रामृतपानकेभ्यो नमो नमो भैर
विभैरवेभ्यः ॥ सिद्धाष्टकादानमहाशुनिभ्यः
श्रीभैरवाचारकृतादरेभ्यः ॥ स्वाधीनतामु
क्तिनिजेभ्यो नमो नमो भैरवविभैरवेभ्यः ॥
प्रशान्तशास्त्रार्थविचारकेभ्यो निर्दूननाना-
रसकाव्यकेभ्यः ॥ निरस्तनिःशेषविकल्पके
भ्यो नमो नमः ॥ स्वात्मैकभावान्तरिताशेष-
भ्यः ॥ साधुज्यसाम्राज्यमहावलोकरेभ्यः ॥ श्रीम
च्चिदानन्दितविग्रहेभ्यो नमो नमो ॥ पराप्रसा
दास्पदमानसेभ्यो ब्रह्मादयस्तानरसाकुले
भ्यः ॥ शिवोऽहमित्यात्मनिवेदनेभ्यो नमो न
मो भैरवविभैरवेभ्यः ॥ सर्वंध्यासर्वदासर्वसा
र्धं घटपटादिसत् ॥ नरागजनितविश्वाकारंब्रह्मै
दमिति निश्चयम् ॥ अहमेवपरोहंसः शिवः
परमकारणम् ॥ मत्स्याणोसनपद्मामालीन

© Dharmarth Trust. Digitized By eGangotri

समरसंगतः॥सच्चिदानन्दनिलयंपराप
रम्कारणम्॥शिवाह्वयप्रकाशाढ्यंप्रण
मल्यामधीमहि॥अनेनवीरस्तवकीर्त-
नेनसमुद्धृतक्लेशस्ववासनोदम॥संसार
कान्तारमहार्णवेस्मि॥निमज्जमानंजग-
दुद्धरेयम्॥नेदंतत्साधकाःसर्वेविनश्यन्त
विह्वलकाः॥अवस्थाशाम्भवीमेस्तुप्रसन्नो
स्तुगुरुःसदा॥इतिपठन्सर्वान्सामयिका-
नभिषिच्यविशेषार्घ्यपात्रमुद्धृत्य।शिर-
सिस्थितायगुरवेसमर्प्य॥तत्पादुकाश्रि-
तस्समर्प्य॥मूलेविद्ययागुरुपादुकावि-
धानेचस्वादेति॥स्वमूलाधारकुण्डलिन्या
सकंपरदेवतास्वविद्वत्तृप्ता॥तज्जलपा
त्रान्तरेकृत्वास्वीयात्॥शेषंप्रियशिष्यायप्र
सादबुद्ध्याकिञ्चिद्दद्यात्॥सोपिपात्रेकृत्वा
तज्जलंप्राश्नीयात्॥इत्यमंत्रप्रतिपत्तिःत-
तःस्वरूपदिष्टविधिनाशेषकर्मसमाप-
येत्॥ततस्तत्राद्यपात्रेणाय॥पुष्पाक्षता-
न्वितंतज्जलमादाय॥नमोविवस्वतेब्रह्मन्-

© Dharmarth Trust. Digitized By eGangotri

भास्वते विश्वतेजसे ॥ नमः सर्वत्रसुवेयस
विचित्रकर्मदायिने ॥ ह्रां ह्रीं हंसः ॥ सूर्यपषतेर्घ
स्वाहेति सूर्यार्घं दत्वा ॥ कृतांजलिः ॥ येयत्
छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम ॥ सर्वं तच्-
छिद्रमस्तु भास्करस्य प्रसादतः ॥ इत्यच्छिद्रं-
धारयेत् ॥ ततो मूलविद्यया प्राणायामत्रय-
पूर्वकं ॥ षडंगादिकरषडंगन्यासान्विधाय ॥
श्रीगुरुक्रमगुरुस्तोत्रं पठित्वा ॥ श्रीगुरुं प्रणम्य ॥
मूलविद्याद्वितीयबीजेन निर्माल्यं शिरसि
धृत्वा ॥ मूलविद्यया चरणोदकं स्वीकृत्य ॥ श्री
परदेवताम्बाम

© Dharmarth Trust. Digitized By eGangotri

ॐनमःशिवाय

ॐश्रीगणेशायनमः।ॐनमःशिवायै।ॐशिवः

शक्त्यायुक्तोयदिभवतिशक्तःप्रभवितुं।।नचे
देवंदेवोनखलुकुशलःस्पंदितुमपि।।अत
स्त्वामाराध्यांहरिहरविरिंच्यादिभिरपि।।प्रण
न्तुंस्तोतुंवाकथमकृतपुण्यःप्रभवति।।१।।त
नीयांसंपांसुंतवचरणपंकेरुहभवं।विरिं
चिःसंचिन्वन्विरचयतिलोकानविकलं।।व
हत्येनंशौरिःकथमपिसहस्रेणशिरसां।।
हरःसंक्षुभ्यैनंभजतिभसितोद्धूलनविधिं।।२
अविद्यानामंतस्तिमिरमिहिरद्वीपनगरी।।
जडानांचैतन्यस्तवकमकरंदस्रुतिसिरा।।
दरिद्राणांचिंतामणिगुणनिकाजन्मजलधौ।
निमग्नानांदंष्ट्रामुररिपुवराहस्यभवती।।३
त्वदन्यःपाणिभ्यामभयवरदोदैवतगण।
स्त्वमेकानैवासिप्रकटितवराभीत्यभिनया।
भयात्त्रातुंदातुंफलमपिचवांछासमधिकं।
शरण्येलोकानांतवहिचरणावेवनिपुणौ।। ४
हरिस्त्वामाराध्यप्रणतजनसौभाग्यजननीं।
पुरानारीभूत्वापुररिपुमपिक्षोभमनयत्।

© Dharmarth Trust. Digitized By eGangotri

सौ॰ १८

स्मरोपि त्वां नत्वा रतिनयनलेह्येन वपुषा ॥ मु-
नीनामप्यंतः प्रभवति हि मोहाय महतां ॥ ५ ॥
धनुः पौष्पं मौर्वी मधुकरमयी पंच विशिखा
वसंतः सामंतो मलयमरुदायोधनरथः ॥
तथाप्येकः सर्वं हिमगिरिसुते कामपि कृपा
मपांगात्ते लब्ध्वा जगदिदमनंगो विजयते ॥ ६
दा॰ क्वणत्कांचीदामा करिकलभकुंभस्तनभरा
परिक्षीणा मध्ये परिणतशरच्चंद्रवदना ॥ ध
नुर्बाणान्पाशं सृणिमपि दधाना करतलैः
पुरस्तादास्तां नः पुरमथितुराहोपुरुषिका ७
सुधासिंधोर्मध्ये सुरविटपिवाटीपरिवृते ॥
मणिद्वीपे नीपोपवनवति चिंतामणिगृहे ॥
शिवाकारे मंचे परमशिवपर्यंकनिलयां ॥
भजंति त्वां धन्याः कतिचन चिदानंदलहरीं ॥ ८
पा॰ महीं मूलापारे कमपि मणिपूरे हुतवहं
स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुप-
रि ॥ मनोपि भ्रूमध्ये सकलमपि भित्वा कुलपथं
सहस्रारे पद्मे सह रहसि पत्या विहरसे ॥ ९ ॥
सुधाधारासारैश्चरणयुगलांतर्विगलितैः ॥

© Dharmarth Trust. Digitized By eGangotri

प्रपंचं सिंचंती पुनरपि रसाम्नायमहसा । अवा
प्य स्वां भूमिं भुजगनिभमध्युष्टवलयं ॥ स्व
मात्मानं कृत्वा स्वपिषि कुलकुंडे कुहरिणि ॥
चतुर्भिः श्रीकंठैः शिवयुवतिभिः पंचभिर
पि । प्रभिन्नाभिः शंभोर्नवभिरपि मूलप्रकृ
तिभिः ॥ चयश्चत्वारिंशद्वसुदलकला त्रि
वलय ॥ त्रिरेखाभिः सार्धं नवभवनकोणाः
परिणताः ॥ ११ ॥ त्वदीयं सौंदर्यं तुहिनगिरिक
न्ये तुलयितुं ॥ कवींद्राः कल्पंते कथमपि
विरिंचिप्रभृतयः ॥ यदालोकौत्सुक्यादमर
ललना याति मनसा ॥ तपोभिर्दुष्प्रापामपि
गिरिशसायुज्यपदवीं ॥ १२ ॥ नरं वर्षीयांसं
नयनविरसं नर्मसु जडं ॥ तवापांगालोके प
तितमनुधावंति शतशः ॥ गलद्वेणीबंधाः
कुचकलशविस्रस्तसिचया ॥ हठात्त्रुट्यत्कां
च्यो विगलितदुकूला युवतयः ॥ १३ ॥ क्षितौ ष
ट्पंचाशद्द्विसमधिकपंचाशदुदके ॥ हुताशे
द्वाषष्टिश्चतुरधिकपंचाशदनिले ॥ दिवि द्विः
षट्त्रिंशन्मनसि च चतुःषष्टिरिति ये ॥ मयूखा

© Dharmarth Trust. Digitized By eGangotri

स्तेषामप्युपरि तव पादांबुजयुगं ॥ ४ ॥ शरज्ज्यो
त्स्नाशुभ्रां शशियुतजटाजूटमकुटां ॥ वरत्रास
त्राणस्फटिकघुटिकापुस्तककरां ॥ सकृन्न
त्वा नत्वा कथमिव सतां सन्निदधते ॥ मधुक्षी
रद्राक्षामधुरिमधुरीणा भणितयः ॥ ५ ॥ कवी
न्द्राणां चेतः कमलवनबालातपरुचिं ॥ भजन्
ते ये संतः कतिचिदरुणामेव भवतीं ॥ विरिं
चिप्रेयस्यास्तरलतरशृंगारलहरी ॥ गभीरा
भिर्वाग्भिर्विदधति सतां रंजनममी ॥ ६ ॥ स
वित्रीभिर्वाचां शशिमणिशिलाभंगिरुचि
भिर्वशिन्याद्याभिः त्वां सह जननि संचिंतय
ति यः ॥ स कर्ता काव्यानां भवति महतां भं
गिसुभगैः ॥ वचोभिर्वाग्देवीवदनकमला
मोदमधुरैः ॥ ७ ॥ तनुच्छायाभिस्ते तरुणत
रणिश्रीसरणिभिः ॥ दिवं सर्वामुर्वीमरुणिम
निमग्नां स्मरति यः ॥ भवंत्यस्य त्रस्यद्वनह
रिणशालीननयनाः ॥ सहोर्वश्या वश्याः
कति कति न गीर्वाणगणिकाः ॥ ८ ॥ मुखं
बिंदुं कृत्वा कुचयुगमधस्तस्य तदधो ॥ हरा

© Dharmarth Trust. Digitized By eGangotri

र्धं ध्यायेद्यो हरमहिषि ते मन्मथकलां॥ स स
द्यः संक्षोभं नयति वनिता इत्यतिलघु त्रिलो
कीमप्याशु भ्रमयति रवीन्दुस्तनयुगां॥ १९॥ कि
रन्तीमङ्गेभ्यः किरणनिकुरुम्बामृतरसं॥ हृ
दि त्वामाधत्ते हिमकरशिलामूर्तिमिव यः॥
स सर्पाणां दर्पं शमयति शकुन्ताधिप इव॥
ज्वरप्लुष्टान्दृष्ट्या सुखयति सुधाधारसिरया॥ २०
तडिल्लेखातन्वीं तपनशशिवैश्वानरमयीं॥
निषण्णां षण्णामप्युपरि कमलानां तव क
लां॥ महापद्माटव्यां मृदितमलमायेन मन
सा॥ महान्तः पश्यन्तो दधति परमाह्लादलहरीं॥ २१
भवानि त्वं दासे मयि वितर दृष्टिं सकरुणां॥
इति स्तोतुं वाञ्छन्कथयति भवानि त्वमि
ति यः॥ तदैव त्वं तस्मै दिशसि निजसायुज्य
पदवीं॥ मुकुन्दब्रह्मेन्द्रस्फुटमकुटनीराजित
पदां॥ २२॥ त्वया हृत्वा वामं वपुरपरितृप्तेन
मनसा॥ शरीरार्धं शम्भोरपरमपि शङ्के
हृतमभूत्॥ यदेतत्त्वद्रूपं सकलमरुणा
भं त्रिनयनं॥ कुचाभ्यामानम्रं कुटिलशशि

© Dharmarth Trust. Digitized By eGangotri

चूडालमुकुटं ॥ २३ ॥ जगत्सूते धाता हरिरवति
रुद्रः क्षपयते ॥ तिरस्कुर्वन्नेतत्स्वमपि वपुरी
शस्तिरयति ॥ सदापूर्वः सर्वं तदिदमनुगृ
ह्णाति च शिवः ॥ तवाज्ञामालंब्य क्षणचलि
तयोर्भ्रूलतिकयोः ॥ २४ ॥ त्रयाणां देवा
नां त्रिगुणजनितानां तव शिवे ॥ भवेत्पूजा
पूजा तव चरणयोर्या विरचिता ॥ तथा हि त्व
त्पादोद्वहनमणिपीठस्य निकटे ॥ स्थिता
ह्येते शश्वन्मुकुलितकरोत्तंसमुकुटाः ॥ २५
विरिंचिः पंचत्वं व्रजति हरिराप्नोति विरतिं
विनाशं कीनाशो भजति धनदो याति निध
नं ॥ वितन्द्री माहेन्द्री विततिरपि संमीलितदृ
शा ॥ महासंहारेस्मिन्विहरति सति त्वत्प
तिरसौ ॥ २६ ॥ जपो जल्पः शिल्पं सकलम
पि मुद्राविरचना ॥ गतिः प्रादक्षिण्यक्रमण
मशनाद्याहुतिविधिः ॥ प्रणामः संवेशः
सुखमखिलमात्मार्पणदृशा सपर्यापर्या
यस्तव भवतु यन्मे विलसितं ॥ २७ ॥ ददाने
दीनेभ्यः श्रियमनिशमाशानुसदृशी ॥ म

मंदं सौंदर्यैक मकरंदं विकिरति ॥ तवा
स्मिन्मंदारस्तवकसुभगे यातु चरणे ॥ निम
ज्जन्मज्जीवः करणचरणैः षट्चरणतां ॥ २७ ॥
सुधामप्यास्वाद्य प्रतिभयजरामृत्युहरणीं
विपद्यंते विश्वे विधिशतमखाद्या दिविषदः
करालं यत्क्ष्वेडं कवलितवतः कालकलना
न शंभोस्तन्मूलं तव जननी ताटंकमहि
मा ॥ २८ ॥ किरीटं वैरिंचं परिहर पुरः कैटभ
भिदः ॥ कठोरे कोटीरे स्खलसि जहि जंभा
रिमुकुटं ॥ प्रणम्रेष्वेतेषु प्रसभमभियात
स्य भवनं ॥ भवस्याभ्युत्थाने तव परिजनो
क्तिर्विजयते ॥ २९ ॥ चतुःषष्ट्या तंत्रैः सकलम
भिसंधाय भुवनं ॥ स्थितस्तत्तत्सिद्धिप्रसव
परतंत्रैः पशुपतिः ॥ पुनस्त्वन्निर्बंधादखि
लपुरुषार्थैकघटना ॥ स्वतंत्रं ते तंत्रं क्षिति
तलमवातीतरदिदं ॥ ३० ॥ शिवः शक्तिः का
मः क्षितिरथ रविः शीतकिरणः ॥ स्मरो हं
सः शक्रस्तदनु च परामारहरयः ॥ अमी हृ
ल्लेखाभिस्तिसृभिरवसानेषु घटिता । भजं त

© Dharmarth Trust. Digitized By eGangotri

सौ०
४
५

न्ते वर्णास्ते जननि तव नामावयवतां ॥ ३२ ॥ स्म
रं योनिं लक्ष्मीं त्रितयमिदमादौ तव मनो ॥
निधायैके नित्ये निरवधिमहाभोगरसिका
जपंति त्वां चिंतामणिगुणनिबद्धाक्षवल
याः ॥ शिवाग्नौ जुह्वंतः सुरभिघृतधाराहु
ति शतैः ॥ ३३ ॥ शरीरं त्वं शंभोः शशिमिहि
रवक्षोरुहयुगं ॥ तवात्मानं मन्ये भगवति
नवात्मानमनघं ॥ अतः शेषः शेषीत्ययमु
भयसाधारणतया ॥ स्थितः संबंधो वां सम
रसपरानंदपरयोः ॥ ३४ ॥ मनस्त्वं व्योम त्वं म
रुदसि मरुत्सारथिरसि ॥ त्वमापस्त्वं भूमि
स्त्वयि परिणतायां न हि परं ॥ त्वमेव स्वात्मा
नं परिणमयितुं विश्ववपुषा ॥ चिदानंदा
कारं शिवयुवति भावेन बिभृषे ॥ ३५ ॥ तवा
ज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं ॥ प
रं शंभुं वंदे परिमिलितपार्श्वं परचिता ॥ य मू १
माराध्यं भक्त्या रविशशिशुचीनामविष
ये ॥ निरालोके लोको निवसति हि भालोक
भुवने ॥ ३६ ॥ विशुद्धौ ते शुद्धस्फटिकविशदं

© Dharmarth Trust. Digitized By eGangotri

व्योमजनकं ॥ शिवं सेवे देवीमपि शिवसमा
नव्यसनिनीं ॥ ययोः कान्त्या यान्त्याः शशिकि
रणसारूप्यसरणीं ॥ विधत्ते तान्धीता विल·
सति चकोरीव जगती ॥ ९ ॥ समुन्मीलत्सं·
वित्कमलमकरन्दैकरसिकं ॥ भजे हंसद्वन्द्वं
किमपि महतां मानसचरं ॥ यदालापादष्टा
दशगुणितविद्यापरिणतिं ॥ यदादत्ते दो·
षाद्गुणमखिलमद्भ्यः पय इव ॥ १० ॥ तडिद्व
न्तं शक्त्या तिमिरपरिपन्थिस्फुरणया ॥ स्फु
रन्नानारत्नाभरणपरिणद्धेन्द्रधनुषं ॥ तमः
श्यामं मेघं किमपि मणिपूरैकशरणं ॥ नि
षेवे वर्षन्तं हरमिहिरतप्तं त्रिभुवनं ॥ ११ ॥ तव
स्वाधिष्ठाने हुतवहमधिष्ठाय निरतं ॥ तमी
डे संवर्तं जननि महतीं तां च समयां ॥ यदा·
लोके लोकान्दहति महति क्रोधकलिते ॥
दयार्द्रा ते दृष्टिः शिशिरमुपचारं रचयति ॥ १
नवाधारे मूले सह समयया लास्यपरया ॥
नवात्मानं वन्दे नवरसमहाताण्डवनटं ॥ उ
भाभ्यामेताभ्यामुदयविधिमुद्दिश्य दयया

सौ० सनाथाभ्यां जज्ञे जनकजननीमज्जगदिदं । ४
५ गतैर्माणिक्यत्वं गगनमणिभिः सान्द्रघटि
तं ॥ किरीटं ते हैमं हिमगिरिसुते कीर्तय
ति यः ॥ स नीडेयच्छायाच्छुरणशबलं चंद्र
शकलं ॥ धनुः शौनासीरं किमिदमिति न
बध्नाति धिषणां ॥ ४२ ॥ धुनोतु ध्वांतं नस्तुलित
दलितेन्दीवरवनं ॥ घनस्निग्धश्लक्ष्णं चिकु
रनिकुरंबं तव शिवे ॥ यदीयं सौरभ्यं सहज
मुपलब्धुं सुमनसो ॥ वसंत्यस्मिन्मन्ये वल
मथनवाटीविटपिनां ॥ ४३ ॥ वहंती सिंदूरं
प्रबलकबरीभारतिमिर ॥ द्विषां वृंदैर्वंदी
कृतमिव नवीनार्ककिरणं ॥ तनोतु क्षेमं
नस्तव वदनसौंदर्यलहरी ॥ परीवाहस्रोत
स्सरणिरिव सीमंतसरणिः ॥ ४४ ॥ अरालैः
स्वाभाव्यादलिकलभसश्रीभिरलकैः ॥ प +२
रीतं ते वक्त्रं परिभवति पंकेरुहरुचिं ॥ दरस्मे
रे यस्मिन्दशनरुचिकिंजल्कसुभगे ॥ सु
गंधा माद्यंति स्मरमथनचक्षुर्मधुलिहः ॥ ४५
ललाटं लावण्यद्युतिविमलमाभाति तव

© Dharmarth Trust. Digitized By eGangotri

य॥ हित्वीयंतन्ममेमुकुटशशिशिवंस्मशा
कलो॥ विपर्यासस्मासाऽभयमपिसंभू-
यवमियः॥ स्वयालेपस्मृतिःपरिणमति
गकाहिमकरः॥४८॥ क्वैवाश्रयेकिंचिडु-
वनभयमेगाश्चतेति॥ त्वदीयेनेत्राम्भो-
मधुकरकविस्पाष्टतगुणे॥ यन्नमेम्पसम्य
नरकरगृहीतेरतिपतिः॥ प्रकोष्ठेमुष्टैव
स्थगयतिनिगूढान्तरमिमे॥४९॥ अहःस्व-
नेसंक्रान्तवनयनमःकोत्मकतया॥ त्रिया
माचामेतेसृजतिरजनीध्यात्मकतया॥ त्र
नीयाहृष्टिस्तेस्फटलितहेमाब्जरुचिः॥
समायतेसंध्यादिवसनिशयोरंतरचरी॥ ५८
विशालाकल्याणीस्फटरुचिरयोध्याकुव
लयैः॥ कृपाधाराधाराकिमपिमधुराभोग
वतिका॥ अवंतीहृष्टिस्तेवहुनगरविस्तार
विजया॥ ध्रुवंतत्तन्नामव्यवहरणयोग्याचि
जयते॥५०॥ कवीनांसंदर्भस्तवकमकरंदैक मै०
भरितं॥ कटाक्षव्याक्षेपभ्रमरकलभौकर्ण
युगलं॥ अमुंचेनोहष्टान्तवनवरसास्व

सौ० ९ दतरलौ ॥ असूयासंसर्गादलिकनयनंकिं
चिदरुणं ॥ ५० ॥ शिवेशृंगारार्द्रा तदितरज
नेकुत्सनपरा ॥ सरोषागंगायांगिरिशच
रितेविस्मयवती ॥ हराहिभ्योभीतासरसि
रुहसौभाग्यजयिनी ॥ सखीषुस्मेरातेजन
निमयिदृष्टिःसकरुणा ॥ ५१ ॥ गतेकर्णाभ्य
र्णंगरुतइवपक्ष्माणिदधती ॥ पुरांभेत्तुश्चि
त्तप्रशमरसविद्रावणफले ॥ इमेनेत्रेगोत्रा
धरपतिकुलोत्तंसकलिके ॥ तवाकर्णा·
कृष्टस्मरशरविलासंकलयतः ॥ ५२ ॥ वि·
भक्तत्रैवर्ण्यंव्यतिकरितलीलांजनतया ॥
विभातित्वन्नेत्रत्रितयमिदमीशानदयिते
पुनःस्रष्टुंदेवान्द्रुहिणहरिरुद्रानुपरतान्र
जःसत्त्वंबिभ्रत्तमइतिगुणानांत्रयमिदम् ॥ ५३
पवित्रीकर्तुंनःपशुपतिपराधीनहृदये ॥
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः
नदःशोणोगंगातपनतनयेतिध्रुवममुं ॥
त्रयाणांतीर्थानामुपनयसिसंभेदमनघं ॥ ५४
तवापर्णेकर्णेजपनयनपैशुन्यचकिता ॥

विलीयंते तोये नियतमनिमेषाः शफरि-
काः ॥ इयं श्रीविद्धस्फुटपुटकपाटं कुवलयं
जहाति प्रत्यूषे निशि च विघटय्य प्रविशा-
ति ॥ ५५ ॥ निमेषोन्मेषाभ्यां प्रलयमुदयं या-
ति जगती ॥ तवेत्याहुः संतो धरणिधरराज-
न्यतनये ॥ त्वदुन्मेषाज्जातं जगदिदमशे-
षं ~~[illegible]~~ प्रलयतः ॥ परि-
त्रातुं शंके परिहृतनिमेषास्तव दृशः ॥ ५६
दृशा द्राघीयस्या दरदलितनीलोत्पलरु-
चा ॥ दवीयांसं दीनं स्नपय कृपया मामपि
शिवे ॥ अनेनायं धन्यो भवति न च ते हा-
निरियता ॥ वने वा हर्म्ये वा समकरनिपा-
तो हिमकरः ॥ ५७ ॥ अरालं ते पालीयुगल-
मगराजन्यतनये ॥ न केषामाधत्ते कुसु-
मशरकोदंडकुतुकं ॥ तिरश्चीनो यत्र श्रव-
णपथमुल्लंघ्य विलसन्नपांगव्यासंगो
दिशति शरसंधानधिषणां ॥ ५८ ॥ स्फुर-
द्गंडाभोगप्रतिफलितताटंकयुगलं ॥ च-
तुश्चक्रं मन्ये तव मुखमिदं मन्मथरथं ॥ य-

सौ. ८

माहत्यइहत्यमवनिरथमकेंदुचरणं। महा
वीरोमारःप्रमथपतयेसज्जितवते॥५९॥स
रस्वत्याःसूक्तीरमृतलहरीकौशलहरीः।
पिवंत्याःशर्वाणिश्रवणचुलकाभ्यामवि
रलं॥चमत्कारश्लाघाचलितशिरसःकुं
डलगणो॥झणत्कारैस्तारैःप्रतिवचनमा
चष्टइवते॥६०॥असौनासावंशस्तुहिन-
गिरिवंशध्वजपटि॥त्वदीयोनेदीयःफ-
लतुःफलमस्माकमुचितं॥वहत्यंतर्मु-
क्ताःशिशिरतरनिःश्वासघटिताः॥समृ
द्ध्यायत्तासांबहिरपिचमुक्तामणिधरः॥ ६१
प्रकृत्यारक्तायास्तवसुदतिदंतच्छदरु
चेः॥प्रवक्ष्येसादृश्यंजनयतिकथंविद्रुमल
ता॥नबिंबंतद्बिंबप्रतिफलनलाभाद-
रुणितं॥तुलामध्यारोढुंकथमिवनल
ज्जेतकलया॥६२॥स्मितज्योत्स्नाजालंत-
ववदनचंद्रस्यपिवतां॥चकोराणामासी
दतिरसतयाचंचजडिमा॥अतस्तेशीतां
शोरमृतलहरीमम्लरुचयः॥पिवंतिस्व

© Dharmarth Trust. Digitized By eGangotri

च्छंदंनिशिनिशिभृशंकांचिकधिया ॥ ८३ ॥
अविश्रांतंपत्युर्गुणगणकथाम्रेडनजपा
जपापुष्पच्छायाजननितवजिह्वाविजयते
यदग्रासीनायाःस्फटिकदृषदच्छच्छवि
मयी ॥ सरस्वत्यामूर्तिःपरिणमतिमाणि
क्यवपुषा ॥ ८४ ॥ रणेजित्वादैत्यानपहृत·
शिरस्त्रैःकवचिभिर्निवृत्तैश्चंडांशत्रिपुर·
हरनिर्माल्यविमुखैः ॥ विशाखेन्द्रोपेन्द्रैःश
शिविशदकर्पूरधवला ॥ विलीयंतेमा
तस्तववदनतांबूलकणिकाः ॥ ८५ ॥ विपं
च्यागायंतीविविधमपदानंपशुपते ॥ स्त्व·
यारब्धेवक्तुंचलितशिरसासाधुवचने ॥
त्वदीयैर्माधुर्यैरपलपिततंत्रीकलरवां
निजांवीणांवाणीनिचुलयतिचोलेननि
भृतं ॥ ८६ ॥ कराग्रेणस्पृष्टंतुहिनगिरिणा
वत्सलतया ॥ करग्राह्यंशंभोर्मुखमुकु·
रवृंतंगिरिसुते ॥ गिरीशेनोदस्तंमुहुरध
रपानाकुलतया ॥ कथंकारंब्रूमस्तवा·
चिबुकमौपम्यरहितं ॥ ८७ ॥ भुजाश्लेषा

© Dharmarth Trust. Digitized By eGangotri

त्यं पुरदमयितुः कंटकवती ॥ तव ग्रीवा
धत्ते मुखकमलनालश्रियमियं ॥ स्वतः
श्वेता कालागुरुबहुलजंबालमलिना ॥
मृणालीलालित्यं वहति यदधो हारलति
का ॥ ६८ ॥ गले रेखास्तिस्रो गतिगमकगी
तैकनिपुणे ॥ विवाहव्यानद्धत्रिगुणगुण
संख्याप्रतिभुवः ॥ विराजंते नानाविधम
धुररागाकरभुवां ॥ त्रयाणां ग्रामाणां
स्थितिनियमसीमान इव ते ॥ ६९ ॥ मृणा
लीमृद्वीनां तव भुजलतानां चतसृणां ॥ च
तुर्भिः सौंदर्यं सरसिजभवः स्तौति वदनै
नखेभ्यः संत्रस्यन्प्रथममथनादंधकरि
पोश्चतुर्णां शीर्षाणां सममभयहस्तार्प
णधिया ॥ ७० ॥ नखानामुद्योतैर्नवनलिन
रागं विहसतां कराणां ते कांतिं कथय
कथयामः कथममीं ॥ कयाचिद्वा साम्यं
भजतु कलया हंत कमलं ॥ यदि क्रीडल्ल
क्ष्मीचरणतललाक्षारसचणं ॥ ७१ ॥ स
मं देवि स्कंदद्विपवदनपीतं स्तनयुगं ॥ त

© Dharmarth Trust. Digitized By eGangotri

वेदनः श्रेवेदं हरतस्सततं प्रस्कृतस्तुवम् ॥ यदा
लोकाश्रंकाकुलितलिदयोदासज्जनकः ॥
स्वकेभोहेरवः परिमृशानिदलेनजोडिति ॥ ३२
श्रमृतवदेजावमृतरसमाणिकाकलेश ।
नसंदेहसंदेनराकुलमताकेमनसिनः ॥
पिवंतौतायस्माटोविदिनवभ्रूसगमरसौ ॥
कुमारावधापिहिरदवदनक्रौंचदलनौ ॥ ३२
वहन्यवस्लेबरमवदनकुमभ्रकृतिभिः ॥
समारब्धास्तुक्तामणिभिरमलोहास्लति
कां ॥ कुचाभोगाविबाथरुचिविभिंतःश
वलितार्धप्रतापध्वाभिस्थांशुराविजयितः को
तिमिवते ॥ ७४ ॥ कुचौसद्यःस्विद्यत्तटघटि-
तकूर्पासभिदुरौ ॥ कषंतौदोर्मूलेकनक-
कलशाभौकलयतः ॥ तवत्रातुंभंगादल
मितिवलग्नंतनुभुवात्रिधानद्धंदेविविवलि
लवल्लीवल्लिभिरिव ॥ ७५ ॥ नवस्तन्यंमन्ये
धरणिधरकन्येहृदयतः ॥ पयः पारावार
परिवहतिसारस्वतमिव ॥ दयावत्यादत्तं
द्रविडशिशुरास्वाद्यतवयत्कवीनांप्रौढानां

© Dharmarth Trust. Digitized By eGangotri

सौ॰ ९ फं

9

नामजननि कमनीयः कवयिता ॥७६॥ हरक्रो
धज्वालावलिभिरवलीढेन वपुषा ॥ गभी
रे ते नाभीसरसि कृतसंगो मनसिजः ॥ समु
त्तस्थौ तस्मात् चलतनये धूमलतिका ॥ जन
स्तां जानीते जननि तव रोमावलिरिति ॥७७॥
यदेतत्कालिंदीतनुतरतरंगाकृति शिवे ॥
कृशे किंचिन्मध्ये भवति तव तेहाति सु
धियां ॥ विमर्दादुद्भूतं कुचकलशयोर
न्तरगतं तनूभूतं व्योम प्रविशदिव नाभी
कुहरिणीम् ॥७८॥ स्थिरो यत्तावर्तः स्तन
मुकुलरोमावलिलता ॥ जलावालं कुंडं कु
सुमशरतेजोहुतभुजः ॥ रतेर्लीलागारं
किमपि तव नाभीति गिरिजे बिलद्वारं सि
द्धेर्गिरिशनयनानां विजयते ॥७९॥ निसर्ग
क्षीणस्य स्तनतटभरेण क्लमजुषो नमन्मू
र्तेर्नाभौ वलिषु प्रणिके स्फुरत्नत इव ॥ चिरं ते
मध्यस्य त्रुटिततटिनीतीरतरुणा ॥ समाव
स्थास्थेम्ना भवतु कुशलं शैलतनये ॥८०॥ गु
रुत्वं विस्तारं क्षितिधरपतिः पार्वति निज

© Dharmarth Trust. Digitized By eGangotri

न्नितंबादाछिद्यत्वयिहरणरूपेणनिदधे
अतस्तेविस्तीर्णोगुरुरयमशेषांवसुमतीं
नितंबप्राग्भारस्थगयतिलघुत्वंनयतिच ८९
करींद्राणांशुंडाकनककदलीकांडपटली
मुभाभ्यामूरुभ्यामुभयमपिनिर्जित्यभव·
ती॥सुवृत्ताभ्यांपत्युःप्रणतिकठिनाभ्यां
गिरिसुते॥विधिज्ञेजानुभ्यांविबुधकरि·
कुंभद्वयमसि॥८२॥पराजेतुंरुद्रंद्विगुण
शरगर्भौगिरिसुते॥निषंगौजंघेतेविष·
मविशिखोबाढमकृत॥यदग्रेदृश्यंतेदश
शरफलाःपादयुगलीनखाग्रच्छद्मान
स्सुरमुकुटशाणैकनिशिताः॥८३॥श्रुती·
नांमूर्धानोदधतितवयौशेखरतया॥ममा
प्येतौमातःशिरसिदययाधेहिचरणौ॥य
योःपाद्यंपाथःपशुपतिजटाजूटतटिनी
ययोर्लाक्षालक्ष्मीररुणहरिचूडामणिरु
चिः॥८४॥हिमानीहंतव्यंहिमगिरिनिटाके
निरुचिरौ॥निशायांनिद्राणंनिशिचरम
भागेचविशदौ॥परंलक्ष्मीपात्रंश्रियम

© Dharmarth Trust. Digitized By eGangotri

सौ०
९
10

पिसतंनौसमयिनां॥सरोजंत्वत्पादौजननर
निजयतश्चित्रमितिकिम्॥८४॥नमोवाकं
ब्रूमोनयनरमणीयायपदयो॥स्तवास्मैद्वं
द्वायस्फुटरुचिरसालक्तकवते॥असूयत्य
त्यंतंयदभिहननायस्पृहयते॥पशूनामी
शानःप्रमदवनकंकेलितरवे॥८५॥मृषा
कृत्वागोत्रस्खलनमथवैलक्ष्यनमितं॥ल
लाटेभर्तारंचरणकमलेताडयतिते॥चि
रादंतःशल्यंदहनकृतमुन्मीलितवतातु
लाकोटिक्वाणैःकिलिकिलितमीशान
रिपुणा॥८६॥पदंतेकीर्तीनांप्रपदमपदं
देविविपदां॥कथंनीतंसद्भिःकठिनकम
ठीकर्परतुलाम्॥कथंवाबाहुभ्यामुपयम
नकालेपुरभिदा॥यदादायन्यस्तंदृषदिद
यमानेनमनसा॥८७॥नखैर्नाकस्त्रीणांक
रकमलसंकोचशशिभि॥स्तरूणांदिव्या
नांहसतइवतेचंडिचरणौ॥फलानिःस्वः
स्थेभ्यःकिसलयकराग्रेणददतां॥दरिद्रे
भ्योभद्रांश्रियमनिशमह्नायददतौ॥८८॥

© Dharmarth Trust. Digitized By eGangotri

कदाकालेमातःकथयकलितालक्तकर
सं॥पिबेयंविद्यार्थीतवचरणनिर्णेजनज
लम्॥प्रकृत्यामूकानामपिचकविताका-
रणतया॥यदाधत्तेवाणीमुखकमलता-
म्बूलरसता॥९०॥पदन्यासक्रीडापरिच
यमिवारब्धुमनसःस्खलंतस्तेखेलंभवनक-
लहंसानजहति॥स्वविक्षेपंशिक्षांसुभग
मणिमंजीररणितच्छलादाचक्षाणंचर-
णकमलंचारुचरिते॥९१॥अरालाकेशे
षुप्रकृतिःसरलामंदहसिते॥शिरीषाभा
गात्रेदृषदिवकठोराकुचतटे॥भृशंतन्वी
मध्येपृथुरपिवरारोहविषये॥जगत्त्रातुंश
म्भोर्जयतिकरुणाकाचिदरुणा॥९२॥पु
राराते रंतःपुरमसितनस्त्वच्चरणयोः॥स
पर्यामर्यादातरलकरणानामसुलभा॥
तथाह्येतेनीताःशतमखमुखाःसिद्धिम
तुला॥तवद्वारोपान्तस्थितिभिरणिमा-
द्याभिरमराः॥९३॥समानीतःपद्भ्यांमणि
मुकुरतामंबरमणि॥र्भयादास्यंनवहति

© Dharmarth Trust. Digitized By eGangotri

सौ॰ ११

मितकिरणश्रेणिमसृणाः॥ दधाति त्वद्वक्त्र-
प्रतिफलितविभ्रांतविकचं॥ निरातंकं चं-
द्रान्निजहृदयपंकेरुहमिव॥ ६४॥ गतास्ते म-
चत्वं द्रुहिणहरिरुद्रेश्वरभृतः॥ शिवः स्वच्छ-
च्छायाघटितकपटप्रच्छदपटः॥ त्वदीयानां
भासां प्रतिफलनरागारुणतया॥ शरी-
री शृंगारो रस इव दृशां दोग्धि कुतुकम्॥ ६ ५
कलंकः कस्तूरी रजनिकरबिंबं जलमयं
कलाभिः॥ कर्पूरैर्मरकतकरंडं निबिडितं
पुनस्त्वद्भोगेन प्रतिदिनमतो रिक्तकुहरं॥
विधिर्भूयो भूयो निबिडयति नूनं तव कृते॥ २८
स्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिर-
भितो॥ निषेव्ये नित्ये त्वामहमिति सदा भा-
वयति यः॥ किमाश्चर्यं तस्य त्रिनयनस-
मृद्धिं तृणयतो॥ महासंवर्ताग्निर्विरचय-
ति नीराजनविधिम्॥ २१॥ समुद्भूतस्थूल-
स्तनभरमुरश्चारुहसितं॥ कटाक्षे कंद-
र्पः कुसुमितकदंबद्युतिवपुः॥ हरस्य त्व-
द्भ्रांतिं मनसि जनयामास मदनो॥ भवत्या

© Dharmarth Trust. Digitized By eGangotri

ये भक्ताः परिगणितिरमीषामियमुमे ॥९८॥
कलत्रं वैधात्रं कति कति भजन्ते न कवयः
श्रियो देव्याः को वा न भवति पतिः कैरपि
धनैः ॥ महादेवं हित्वा तव सति सतीनाम
चरमे ॥ कुचाभ्यामासंगः कुरवकतरोर
प्यसुलभः ॥९९॥ गिरामाहुर्देवीं द्रुहिण-
गृहिणीमागमविदो ॥ हरेः पत्नीं पद्मां
हरसहचरीमद्रितनयाम् ॥ तुरीया कापि
त्वं दुरधिगमनिःसीममहिमा ॥ महा
माया विश्वं भ्रमयसि परब्रह्ममहिषि ॥१००॥
सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहर
ते रतेः पातिव्रत्यं शिथिलयति रम्येण वपु
षा ॥ चिरं जीवन्नेव क्षपितपशुपाशव्यति
करः ॥ परब्रह्माभिख्यं रसयति रसं त्व
द्भजनवान् ॥१०१॥ निधे नित्यस्मेरे निरवधि
गुणे नीतिनिपुणे ॥ निराघातज्ञाने निय-
मपरचित्तैकनिलये ॥ नियत्या निर्मुक्ते
निखिलनिगमान्तस्तुतिपदे ॥ निरातंके
नित्ये निगमय ममापि स्तुतिमिमां ॥१०२

सौ· १२

प्रदीपज्वालाभिर्दिवसकरनीराजनवि
धिस्सुधासूतेश्चंद्रोपललजललवैरर्घ्यर
चना॥ स्वकीयैरंभोभिस्सलिलनिधिसौ
हित्यकरणं॥ त्वदीयाभिर्वाग्भिस्तवज
ननिवाचांस्तुतिरियम्॥१०३॥ इतिश्री-
मदाचार्यविरचितं शंकरकृतं सौंदर्यलहरी
स्तोत्रं संपूर्णम् ॥ ॥ ॥ ॥

श्रीनगरे लिखितमिदं संवत् १९३९ वै.

12

कृ° पृ० ६५

© Dharmarth Trust. Digitized By eGangotri

१६०	१५९	१५८	१५७	१५६	१५५	१५४	१५३	१५२
१४३	१४३	१४४	१४६	१४७	१४८	१४९	१५०	१५१
१४२	१४१	१४०	१३९	१३८	१३७	१३६	१३५	१३४
१२५	१२६	१२७	१२८	१२९	१३०	१३१	१३२	१३३
१२४	१२३	१२२	१२१	१२०	११९	११८	११७	११६
१०९	११०	१११	११२	११२	११३	११३	११४	११५
१०८	१०७	१०६	१०५	१०४	१०३	१०२	१०१	१००
९१	९२	९३	९४	९५	९६	९७	९८ ९९	
९०	८९	८८	८७	८६	८५	८४	८३ ८२	
७३	७४	७५	७६	७७	७८	७९	८० ८१	
७२	७१	७०	६९	६८	६७	६६	६५ ६४	
५५	५६	५७	५८	५९	६०	६१	६२ ६३	
५४	५३	५२	५१	५०	४९	४८	४७ ४६	
३७	३८	३९	४०	४१	४२	४३	४४ ४५	
३६	३५	३४	३३	३२	३१	३०	२९ २८	
१९	२०	२१	२२	२३	२४	२५	२६ २६	
१८	१७	१६	१५	१४	१३	१२	११ १०	
१	२	३	४	५	६	७	८	९

© Dharmarth Trust. Digitized By eGangotri

© Dharmarth Trust. Digitized By eGangotri


© Dharmarth Trust. Digitized By eGangotri